नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – 28

No. of Printed Pages – 8

# VU-86-Vyak. Shastra

## व्याकरणशास्त्रम् (ऐच्छिकम्)

**वरिष्ठ उपाध्याय परीक्षा, 2021**

**समय : 3¼ घण्टे**

**पूर्णांक : 80**

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामांकः अनिवार्यतो लेखनीयः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

OFFICE COPY

(3) सर्वेषां प्रश्नानामुत्तरानिउत्तरपुस्तिकायामेव लेखनीयानि ।

(4) एकस्य प्रश्नस्य सर्वेषां खण्डानामुत्तराणि एकत्र एव लेखनीयानि ।

(5) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतमाध्यमेन एव लेखनीयानि ।

## खण्ड – क

1. अधोलिखित–प्रश्नानाम् उत्तराणि उचित–क्रमाक्षरेण लिखत :

(i) 'लिहा' इति पदमस्ति –

(अ) प्रथमैकवचनान्तम्

(ब) द्वितीयाया: बहुवचनान्तम्

(स) सप्तम्या: एकवचनान्तम्

(द) तृतीयाया: एकवचनान्तम् 1

(ii) 'विश्वौह:' इत्यत्र सम्प्रसारणसंज्ञाअनेन सूत्रेण भवति –

(अ) इग्यण: सम्प्रसारणम् (ब) सम्प्रसारणाच्च

(स) वाह ऊठ् (द) सावनडुह: 1

(iii) 'दिव औत्' इति सूत्रेण दिविति प्रातिपदिकस्य आदेशो भवति –

(अ) उत् (ब) औत्

(स) ओत् (द) ऊठ् 1

(iv) किमिति शब्दस्य स्त्रीलिङ्गे सप्तम्येकवचने रूपं भवति –

(अ) कस्याम् (ब) कस्या:

(स) कासाम् (द) कस्मिन् 1

(v) इदमिति शब्दस्य नपुंसकलिङ्गे प्रथमा–बहुवचने रूपं भवति –

(अ) इमानि (ब) इमे

(स) इमा: (द) इदम् 1



OFFICE COPY

(vi) ह्यस् इति अव्ययपदस्य प्रयोगो भवति –

(अ) अनागते दिवसे (ब) प्रत्यूषे

(स) अतीते दिवसे (द) निशारम्भे 1

(vii) 'कुमारी' इत्यत्र स्त्रीत्वे ङीप् प्रत्ययविधानम् अनेन सूत्रेण भवति –

(अ) द्विगोः (ब) उगितश्च

(स) वयसि प्रथमे (द) यञश्च 1

(viii) कस्मिन्नर्थे प्रथमा विभक्तिः न भवति –

(अ) प्रातिपदिकार्थे (ब) संख्यामात्रे

(स) परिमाणमात्रे (द) तादर्थ्ये 1

(ix) 'अकथितं च' इति सूत्रेण कस्मिन् उदाहरणे कर्मसंज्ञा न भवति –

OFFICE COPY

(अ) बलिं याचते वसुधाम्

(ब) माणवकं पन्थानं पृच्छति

(स) तण्डुलानोदनं पचति

(द) क्रोशं कुटिला नदी 1

(x) घ प्रत्ययान्ताः अच् प्रत्ययान्ताश्च शब्दाः अस्मिन् लिङ्गे प्रयुक्ताः भवन्ति –

(अ) नपुंसकलिङ्गे (ब) स्त्रीलिङ्गे

(स) नपुंसकलिङ्गे स्त्रीलिङ्गे च (द) पुल्लिङ्गे 1

एकेन वाक्येन उत्तरत :

2. षट्संज्ञा विधायकं सूत्रं लिखत । 1

3. 'अनडुद्भ्याम्' इत्यत्र हस्य दकारादेशः केन सूत्रेण भवति ? 1

4. विभक्तौ परे इदमो दस्य मकारादेशः केन सूत्रेण भवति ? 1

5. झलि पदान्ते च नहो हस्य धकारादेशः केन सूत्रेण भवति ? 1

6. 'अहोभिः' इत्यत्र नस्य रुत्वं केन सूत्रेण भवति ? 1

7. स्वरादीनां निपातानां च अव्ययसंज्ञा–विधायकं सूत्रं लिखत । 1

8. यस्मात् सर्वा विभक्तिः नोत्पद्यते, तस्य तद्धितान्तशब्दस्य अव्ययसंज्ञा केन सूत्रेण भवति ? 1

9. टिड्ढाणञ् __________ इति सूत्रं पूरयत । 1

10. गतिबुद्धिप्रत्यवसानार्थ __________ इति सूत्रं पूरयत । 1

11. ऋकारान्ता मातृ __________ इति सूत्रं पूरयत । 1

OFFICE COPY

## खण्ड – ख

12. 'अष्टन आ विभक्तौ' इति सूत्रस्यार्थो लेख्यः । 2

13. तत् शब्दस्य स्त्रीलिङ्गे प्रथमाद्वितीययोः विभक्ति–रूपाणि लिखत । 2

14. गवाक्छब्दस्य रूपाणि क्लीबेऽचगिति भेदतः ।

असन्ध्यवङ्पूर्वरूपैर्नवाधिकशतं मतम् ।।

अस्याः कारिकायाः संक्षिप्तार्थो लेख्यः । 2

15. निम्नलिखित–अव्ययानाम् अर्थो विलिख्य वाक्यप्रयोगं कुरुत – 2

प्रातर्, सहसा, साकम्, स्वस्ति ।

OFFICE COPY

16. 'अजाद्यतष्टाप्' इति सूत्रार्थो लेख्यः । 2

17. 'सहयुक्तेऽप्रधाने' इति सूत्रार्थो लेख्यः । 2

18. 'अन्यूप्रत्ययान्तो धातुः' इति सूत्रस्य सोदाहरणमर्थो लेख्यः । 2

19. निम्नलिखित–शब्दानां लिङ्ग निर्धारणं कुरुत – 2

लक्ष्मीः, पाकः, यज्ञः, ग्रामता

**खण्ड – ग**

20. कयोश्चिद् द्वयोः सूत्रयोः सोदाहरणं व्याख्या विधेया – **2 + 2 = 4**

चतुरनडुहोरामुदात्तः, अनाप्यकः, दश्च, श्वयुवमघोनामतद्धिते ।

21. कयोश्चिद् द्वयोः प्रयोगयोः ससूत्रं सिद्धिर्विधेया – **2 + 2 = 4**

लिट्त्सु, चतुर्णाम्, अयम्, पन्थाः ।

22. कयोश्चिद् द्वयोः प्रयोगयोः ससूत्रं सिद्धिर्विधेया – **2 + 2 = 4**

पश्च, मघोनः, कः, राज्ञः

23. केषाञ्चित् चतुर्णां शब्दानां ससूत्रं लिङ्गनिर्धारणं कुरुत – **1 + 1 + 1 + 1 = 4**

कृतिः, नवतिः, भूमिः, करः, विस्तरः, निधिः

OFFICE COPY

**खण्ड – घ**

24. कौचिद् द्वौ प्रयोगौ साधनीयौ – **2½ + 2½ = 5**

रामेण बाणेन हतो बाली, अक्ष्णा काणः मासमधीते ।

25. कौचिद् द्वौ प्रयोगौ साधनीयौ – **2½ + 2½ = 5**

दण्डेन घटः, विप्राय गां ददाति, प्रजाभ्यः स्वस्ति ।

## खण्ड – ङ

26. केचित् **त्रयः** प्रयोगाः साधनीयाः – **2 + 2 + 2 = 6**

उपानत्, चतसृणाम्, इयम्, आपः, का ।

27. केचित् **त्रयः** प्रयोगाः साधनीयाः – **2 + 2 + 2 = 6**

वारि, कानि, अहोभ्याम्, ददन्ति, इदम् ।

28. केचित् **त्रयः** प्रयोगाः साधनीयाः – **2 + 2 + 2 = 6**

सर्विका, कुरुचरी, गार्गी, सीमा, चटका

OFFICE COPY

DO NOT WRITE ANYTHING HERE

DO NOT WRITE ANYTHING HERE